Shri Raghunath Temple MSS. Library,
JAMMU

No. १३२८

Title स्मृति संस्कार विचार:

Author ×

Extent १० Age १८३८

Subject न्याय शास्त्र

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

स्मृति संस्कार विचारः

१३२७

१०

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

श्रीगणेशाय नमः ॥ घटगोचरस्मृतिं प्रति घटगोचरज्ञानत्वेन न हेतुता। घटनिर्विकल्पकादपि घटस्मरणापत्तेः। अवच्छि-
न्नविषयताशालित्वेन हेतुत्वं कल्पयित्वा तद्वारणेऽपि द्रव्यत्वेन घटज्ञानादिसत्वे घटत्वेन तत्स्मरणापत्तेः। न च घट-
त्वस्मरणं प्रति घटत्वेन ज्ञानत्वेन हेतुत्वकल्पनादेव न तादृशस्मरणापत्तिरिति वाच्यं। घटत्वेन पटादिज्ञानस्यापि त-
दानीं सत्वेन तथापत्तिसंभवात्। किंतु घटत्वेन तद्धर्मस्मरणं प्रति घटत्वेन तद्धर्मज्ञानत्वेन हेतुता। स्वजन्यसंस्का-
रः प्रत्यासत्तिः। एवं तथावि[...] संस्कारत्वेन तथाविधस्मृतित्वावच्छिन्नं प्रति विषयामिश्रितस्मृतित्वावच्छिन्नं प्रति
वा व्यापारीभूतसंस्कारस्य [...]तुता। तथाविधसंस्कारं प्रति तथाविधज्ञानत्वेन हेतुता बोध्या। अथोपेक्षात्मकज्ञा-
स्मा नात् स्मरणापत्तिः। न चोपेक्षान्यत्वेन हेतुत्वकल्पनान्नापत्तिरिति वाच्यं। उपेक्षात्वस्य दुर्वचत्वात्। न चोपेक्षा-
त्वं जातिः। चाक्षुषत्वादिना संकरात्। नापि संस्काराजनकत्वं। उपेक्षाज्ञानव्यावृत्तसंस्कारजनकतावच्छेदकधर्मा-
भावात्। न च ज्ञाननिष्ठतत्तद्व्यक्तित्वं संस्कारजनकतावच्छेदकं तादृशजनकतासंबंधेन संस्कारवदन्यत्वमेवोपेक्षा-
त्वात्। तथा च तादृशसंबंधेन संस्कारवत्वेनैव हेतुत्वं पर्यवसितमिति वाच्यं। अननुगतजनकताकूटघटितत्वेन का-
रणतावच्छेदकस्याननुगमात्। अत्र पुनः स्मृतिं प्रत्येव ज्ञानस्य तद्व्यक्तित्वेन हेतुत्वं जनकतासंबंधेन तादृशस्मृति-
मत्वेनैव संस्कारं प्रति हेतुत्वे यस्यापि विनिगमनाविरहः प्रसक्त एव। संस्कारं प्रति स्मृतिजनकत्वेन जनकत्वे ज्ञानं ॥

CC-0 Dharmartha Trust J&K: An eGangotri-Vaidika Bharata Initiative

स्वस्मृतिजनकताज्ञानाधीनंसंस्कारजनकताज्ञानंसंस्कारजनकताज्ञानाधीनमेवस्वजन्यसंस्कारसंबंधेनस्मृ
तिजनकताज्ञानंइत्यन्योन्याश्रयप्रसंगादितिचेत्‌अनायत्याप्रातिस्विकरूपेणैवउपेक्षात्मकज्ञानव्यक्ती।
नांभेदकूटःकारणतावच्छेदककोटौनिवेश्यता।यत्तु।चाक्षुषत्वादिव्याप्याः नानैवउपेक्षात्वजातयः।तदव
च्छिन्नप्रतियोगिकाभावाल्पीयांसोभेदाउजनकतावच्छेदककोटौनिवेश्यंते।नचजातेरांशिकत्वभियाआंशिको
पेक्षाज्ञानेतादृशजात्यस्वीकारेआंशिकोपेक्षाज्ञानात्स्मरणापत्तिरितिवाच्यं।आंशिकोपेक्षाज्ञानानांअनंत
व्यक्तीनांप्रातिस्विकरूपेणैवभेदनिवेशात्।एवमपिसर्वांशोपेक्षासहस्राणांतत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदस
हस्रानिवेशालाघवादिति।तन्नमृदुधीमहितं।तथाविधजातीनांअनुगतनियामकाभावात्।तुल्ययुक्त्याआहा
र्यत्वादेरपिजातित्वापत्त्यासांकर्यापाताच्च।आहार्यत्वस्यानुगतोपाधिरूपस्यदुर्वचत्वात्।सर्वांशोपेक्षात्मकज्ञा
नभेदास्तुसंस्कारजनकतावच्छेदकतावच्छेदककोटावेवनिवेश्यंते।नज्ञाननिष्ठस्मृतिजनकतावच्छेदककोटौ।त
त्रसंस्कारविरहेणैवस्मृतिविरहोपपत्तेः।नचविनिगमनाविरहः।संस्कारजनकतावच्छेदककोटौभेदानिवेशे १
उपेक्षात्मकज्ञानेभ्योऽप्रामाणिकानंतपंडसंस्कारकल्पनापत्तेः।आंशिकोपेक्षाभेदास्तुतैःसहविशेष्यविशेषण
भावेविनिगमनाविरहभियास्मृतिजनकतायामेवनिवेश्यंते।नचात्रविनिगमनाविरहः।आंशिकोपेक्षाज्ञा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नात्। अन्यांशेऽस्मरणोदयात् तदनुरोधेन तद्धेतुसंस्कारस्यावश्यकत्वात् संस्कारजनकतायां आंशिकोपेक्षात्म
कज्ञानव्यक्तिभेदानिवेशे एतद्विषयकत्वधर्ममात्रकल्पना इतरथा तु धर्मिकल्पनमिति धर्मिकल्पनातो ध
र्मिक~~ल्प~~ल्पनाल्लघीयसीत्यात्सैव विनिगमकत्वात्। एतेन ज्ञानस्मरणयोर्ज्ञानत्वस्मरणत्वाभ्यामेव कार्य
कारणभावो न तु विषयानिवेशनं। पटज्ञानात् घटस्मृतेः संस्काराभावेनापत्तिवारणात्। न च संस्कारस्म
रणयोः कार्यकारणभावे विषयनिवेशानुक्रियत इत्यत्र विनिगमनाविरह इति वाच्यं। संस्कारस्मरणयोः कार्यका
रणभावे तदनिवेशे घटगोचरोपेक्षात्मकज्ञानसत्त्वे पटसंस्कारसत्त्वे घटस्मरणापत्तेः। न च संस्कारस्य व्यापारसंबंधेन
घटज्ञानाभावान्नापत्तिरिति वाच्यं। घटांशेऽपेक्षात्मकपटांशेऽपेक्षात्मकज्ञानजन्यसंस्कारसत्त्वे घटस्मरणापत्ते अ
रिष्टत्वापत्तिकापरास्ता। आंशिकोपेक्षाभेदानां स्मृतिजनकतायामनिवेशात् घटांशेऽपेक्षाज्ञानादपि घटगोच
रसंस्कारोदयात् तदनन्तरं घटस्मरणापत्तेः तदन्यपटज्ञानात् तु स्यादिति। घटस्मृतिं प्रति घटांशोपेक्षान्यतज्ज्ञाचर
ज्ञानत्वेन हेतुताया आवश्यकत्वात् संस्कारस्मरणयोः कार्यकारणभावे तु विषयता निवेशेऽपि क्षत्यभावात्। तत्र
स्मृतित्वसंस्कारत्वाभ्यामेव कार्यकारणभावः। पटगोचरसंस्कारसत्त्वे घटांशोपेक्षान्यघटज्ञानस्य संस्कारसंबंधेना
सत्त्वादेव नापत्तिः। यथा चैवं संस्कारस्य सविषयकत्वव्यवस्थितिस्तत्सर्वमप्येवं विवेचयिष्यते। न चैवमनुमिति

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

स्म॰सं॰
२

लक्षणस्य विशिष्टस्मरणेऽतिव्याप्तिसंपादकस्य संस्कारानुत्पत्त्यैवेत्यादिग्रंथस्यासंगतिः स्मृतिजनकतायां ज्ञांशि
कापेक्षान्यत्वनिवेशात् अनुमितिजनकतायां च तन्निवेशादिति वाच्यं। तावता स्तेरभावात्। वस्तुतस्तु अयं तत्सं
गमनप्रकारस्त्वीयिष्यते। एवं च भूतलत्वधर्मितावच्छेदकतद्भूतलविशेष्यकघटत्वावच्छिन्नतद्घटप्रकारकस्मृतिप्र
तितथाविधनिश्चयत्वेन हेतुता। अतो न संशयाकारज्ञानात्स्मरणापत्तिः। अयं संस्कारजनकतावच्छेदककोटावेव निश्च
यत्वं निवेश्यं तत एव स्मरणवारणसंभवे किं स्मृतिजनकतायां तन्निवेशेनेति। न च विनिगमनाविरहः संशयादपि धर्मि
णो विशेषकल्पितकोट्योरपि स्मरणोदयेन संस्कारकल्पनाया आवश्यकत्वादिति वाच्यं। एवं सति संस्कारजनकता
वच्छेदके तन्निवेशे संशयजन्यसंस्कारे विशिष्टविषयताकल्पनए वगौरवात्। न चापेक्षाभेदैः सह विशेष्यविशेषण
भावविनिगमनाविरह इति स्मृतिजनकतायामेव तन्निवेश्यत इति वाच्यं। तथापि ज्ञांशिकापेक्षाभेदैः सह तस्य संग
दितिमिवं। स्मृतिजनकतावच्छेदककोटौ निश्चयत्वानिवेशे संशयानंतरं स्मृतिवारणासंभवात्। न च संस्काराभावाद २
वन स्मृतिरिति वाच्यं। धर्म्यंश एव संस्कारसत्वात्। न च भूतलत्वावच्छिन्नविशेष्यतानिरूपितघटप्रकारताशालि सं
स्कारविरहात् न तथाविधस्मरणमिति वाच्यं। तथात्वे न संस्कारस्य हेतुत्वाकल्पनात् स्मृतिं प्रति संस्कारत्वेनैव हेतुत्वात्
तदवच्छिन्नस्य धर्मिगोचरसंस्कारस्यैव सत्वात्। तादृशापत्तिसंभवात्। तस्माज्जनकतावच्छेदककोटौ निश्चयत्वनिवेशनमा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

वरूपकमेवेति। अथोपेक्षान्यत्वं न स्मृतिजनकतावच्छेदकं अपि तु उपेक्षात्मकज्ञानास्मृतिवारणाय संस्कारं प्रति उपेक्षा
ज्ञानानां तत्त्वं तेन प्रतिबंधकत्वमाश्रीयते। न चोपेक्षात्मकज्ञानानंतरं अपेक्षात्मकज्ञानानुत्पन्नं संस्कारानुदय
प्रसंग इति वाच्यं उपेक्षात्मकज्ञानानाज्ञानंतरमेव तत्र संस्कारोदयात्। न च यत्रोद्दिष्ट उपेक्षात्मकज्ञानंतरं नंतरं चापेक्षा
त्मकं तद्वितीयक्षणे च पुनरुपेक्षांतरं तत्र संस्कारानुदयप्रसंग इति वाच्यं। तदुपेक्षात्मकव्यक्तेः प्रतिबंधकत्वाकल्पने
क्षतिविरहात्। न चाननुगतमित्याशंकनीयं। तन्मते विशेषणविशेष्यभावविनिगमनाविरहेण महागौरवात्। इत्थं च
विशिष्टस्मरणे इति व्याप्तिः आंशिकोपेक्षात्मकज्ञानानामपि संस्कारप्रतिबंधकत्वे एवापत्तेः स्मृतिजनकतावच्छेदक
तायां तन्निवेशात्। ध्यानूपरं मे दृष्टं सर्वांशोपेक्षायाः प्रतिबध्यतावच्छेदकं संस्कारत्वं आंशिकोपेक्षायास्तद्गोचरसं
स्कारत्वमिति जातोऽन्यगोचरसंस्कारव्यभिचारः संस्कारानुत्पत्त्यैवसाधीयपत्तिरपि तु व्याख्याता। यद्यप्येते इति यदि
विभाव्यते तदा संस्कारनिष्ठस्मृतिजनकतायां विषयनिवेश आवश्यकः। अन्यथा घटांशउपेक्षातोऽपि पटत्वावच्छिन्न
तत्पटविशेष्यकसंस्कारसत्वात् तत्संस्कारसंबंधेन घटज्ञानसत्वात्। इत्थं च निश्चयत्वमपि संस्कारजनकतावच्छेदककोटा
टौ वक्तव्यमिति निवेश्यते। संशयात् ज्ञातत्वावच्छिन्नधर्मिकघटप्रकारकसंस्काराभावाभावात् तादृशस्मरणापत्तेः संभ
वात्। न चोपेक्षावत् संशयस्यापि विशिष्टसंस्कारस्मृतिप्रतिबंधकत्वमस्त्विति किं तदन्यत्वेन हेतुनयेति संशयानंत

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

स्मृ.सं.
३

ऽन्वयत्र निश्चयः तत्र विनष्ट एव संशये संस्कार उपपद्यत इति वाच्यं। अपेक्षाबुद्ध्यात्मकसंशयानंतरं तदनात्मकनिश्चय
स्य तत्र च संशयानंतरं तस्यैयाऽप्रामाण्यविषयको निश्चयस्तदनंतरमुत्पन्नः संशयस्तत्र संस्कारानुदयप्रसंगात्॥
अथ ज्ञानस्मरणयोर्ज्ञानत्वस्मरणत्वाभ्यामेव कार्यकारणभावोस्तु तत्र विषयनिवेशो निरर्थक इति चेदित्थमत एव
तत्। तथा सति सतिविरहात्। एवं संशयात्मकसंस्काराभावादनुगतो बाधकादिविशिष्टसंस्काररूपयोः स्मृति
सामग्र्याः विशिष्टस्मरणस्य विशिष्टायाअनुभवं प्रति प्रतिबंधकतायां संस्कारे तदभावप्रकारकान्यत्वानिवेशेऽपि
लाघवं। न चैवमन्मतेऽपि तदभावप्रकारकान्यत्वं प्रतिबंधकतावच्छेदककोटौ न निवेश्यत इति वाच्यं। संशयाकारसं
स्कारसत्त्वेऽनुभवोपपत्तये तदन्यत्वनिवेशस्यावश्यकत्वात्। अथात्र घटत्वनिश्चयत्वेन घटप्रतियोगिकाभावप्र
ना कारकत्वे तद्घटाभाववद्घटत्वं भूतलमित्याकारकज्ञाते घटवद्भूतलमिति स्मरणानुदयप्रसंगात्। नापि घट ३
त्वावच्छिन्नाभावाप्रकारकत्वं। नीलघटवन्न वेति संशयात् घटस्मरणापत्तेः। न च घटत्वपर्याप्तप्रकारताशालिज्ञान
त्वेन तथाविधस्मरणं प्रति हेतुत्वेन विशेष्यापत्तिरिति वाच्यं। नीलघटवदिति ज्ञानेऽपि नीलांशे मोषदशायां घट
वदिति स्मरणोदयात्। तथा हेतुतायाः कल्पयितुमशक्यत्वात्। अत्र केचित्। संशये उभयप्रकारतानिरूपितै
केव विशेष्यता अन्यत्र तु प्रकारताभेदाद्विशेष्यताभिन्ना। तथा चाभावाप्रकारतानवच्छिन्नघटप्रकारतावच्छिन्ने

नघटस्मरणापत्तेः

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

भूतलत्वावच्छिन्नविशेष्यताशालित्वेन भूतलत्वावच्छिन्नधर्मिकघटप्रकारकस्मृतिं प्रति हेतुतेति न कश्चिद्दोष इत्याहुः।
तद्दूषितमन्यथावश्यं तत्तत्संस्कारजनकतायामेव निश्चयत्वनिवेशात् न काप्यनुपपत्तिः। तथाहि। घटत्वातिरिक्तध
र्मानवच्छिन्नघटत्वावच्छिन्नप्रकारतानिरवच्छिन्नभूतलत्वावच्छिन्नविशेष्यताशालिघटत्वावच्छिन्नाभावाप्रकारकज्ञा
नत्वेन हेतुता कल्प्यते। नीलघटवदित्याकारकज्ञानात् नीलघटवदित्याकारकसंस्कारः प्रजायते न तु कदाचिदपि
घटवदित्याकारकः संस्कारस्मृतिहेतुतायां तत्पर्याप्त्यनिवेशात् नीलांशमोषस्थायां घटवदिति स्मरणमिति
रका ६ न काप्यनुपपत्तिरिति। न च नीलघटवदित्याकारो नीलांशोपेक्षात्मकात् घटवदिति संस्कारो दृश्यात् कथं संस्कारज
नकतायां पर्याप्तिनिवेशः स्यादिति। न च तु नीलघटवदिति संस्कारेणोपपद्यते नीलसंस्कारं प्रति नीलांशोपेक्षा
ज्ञानस्य प्रतिबन्धकत्वकल्पनात्। अन्यथा तदनन्तरं नीलस्मरणप्रतीतिनीलसंस्कारस्य जनकतायां तत्संस्कारभेद
निवेशादेव तादृशस्मरणवारणे तज्ज्ञानस्य नीलसंस्कारं प्रति प्रतिबन्धकत्वाकल्पनात् तदानीं नीलघटवदित्याका
रकसंस्कारस्यैवापपत्तेरिति सम्यगालोचयामः। अथ निश्चयत्वं संशयाकारस्मरणवारणायैव निवेश्यते। तथा च
घटाभाववत्तास्मरणं प्रति घटाभावप्रकारकज्ञानस्य हेतुतायां निश्चयत्वानिवेशेनैव संशयाकारस्मरणवारणं सं
शयं उभयकोटिज्ञानस्यैव संशयतया घटवन्नवेति संशयस्य घटाभावानिश्चयात्मकतया ततो घटाभावस्मरणानु

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

दयेनैव संशयाकारस्मरणासंभवादिति। घटवत्ताज्ञानहेतुतायां निश्चयत्वनिवेशो निरर्थकः। इष्टत्वविशिष्टस्मरणेऽति
व्याप्तिरपि न संगच्छते। उक्तयुक्त्या वह्निव्याप्यधूमवत्तास्मरणे तज्ज्ञानस्य हेतुतायामपि निश्चयत्वानिवेशात्। न च
संशयादेककोटिस्मरणमपि न जायत इति वाच्यं प्रमाणाभावात्। नोद्बोधवतोर्द्वयानुभवविरोधः। येन गुरुणा निश्च
यत्वेन हेतुत्वमभ्युपेयत इति। स्मृतिं प्रति निश्चयत्वेन हेतुत्वमंगीकुर्वतो दीधितिकृतापि निश्चयत्वनिवेशस्य सं
शयाकारस्मरणवारणमेव फलमित्याशयोऽवसीयते। न च घटवत्ताज्ञानहेतुतायामपि निश्चयत्वनिवेशे संशयाकार
स्मरणवारणसंभवे तत्रैव किं न निवेश्यत इति विनिगमकाभावादुभयत्रैव निवेशः स्यादिति वाच्यं। घटवत्तानिश्च
वत्ता यस्य घटाभाववत्त्वावच्छिन्नप्रकारताशून्यत्वरूपस्य घटाभाववत्ताज्ञानीयनिश्चयत्वापेक्षया गुरुशरीरत्वात्तत्रैव निश्चय
त्वस्य निवेशयितुमुचितत्वात्। वस्तुतस्तु न कुत्रापि निश्चयत्वनिवेशः। निश्चयत्वेन हेतुत्वेऽपि प्रसेके निश्चयज
नितसंस्काराभ्यां नियतोद्बोधकसमवधाने स्मृत्यां संशयाकारस्मरणवारणार्थमेककोटिस्मरणसामग्र्याः प
रकोटिस्मरणं प्रति प्रतिबंधकतायां आवश्यकत्वे तेन संशयाकारकज्ञानजन्यसंस्कारादपि संशयाकारस्मरण ५
वारणादिति चेन्न। संस्कारजनकतावच्छेदककोटौ निश्चयत्वानिवेशे संशयाकारज्ञानात् संशयाकारसंस्कारोत्पत्तौ
अननुगतकालादीनामतन्नाशकत्वस्वीकार्ये संशयाकारस्मरणस्य कदाप्यनुदयात्। अन्यविधस्मरणस्यापि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

समानाकारकत्वेन ताभ्यां संस्कारनाशकतयाऽनुगतहेतुतायां तन्नाशानिर्वाहादिति गौरवाद्भिन्न। संज्ञायामनेकोपेक्षात्म
कज्ञानादेकैककोटिस्मृत्युद्बोधकदशायामेकैककोटिस्मरणवारणाय तत्तज्ज्ञानानां प्रातिस्विकरूपेणानन्तभेदनिवेशे च
गौरवात्। अननुगतसंज्ञायामन्यत्वरूपनिरूप्यत्वनिवेशे लाघवाच्च। एते पूर्वोक्तपङ्क्तिका निरस्ताः। न चोपेक्षान्यत्वम
पि अननुगतमेव निवेश्यमिति लुंटाक्यते प्रागेव दूषितत्वात्। ननु संस्कारे किं मानं। अनुभवध्वंसस्य व्यापारत्वसंभवा
त्। प्रतियोग्यभावयोरेकत्राजनकत्वप्रवादस्य प्रमाणाभावेनाश्रद्धेयत्वात्। न च स्मृतिप्रतिबंधकत्वापत्तिः कारणी
भूताभावप्रतियोगित्वस्यैव प्रतिबंधकतापदार्थत्वादिति वाच्यं। संसर्गाभावत्वावच्छिन्नाया अभावत्वावच्छिन्ना
या वा जनकतायाः प्रतियोगितावच्छेदकत्वसंबंधेनावच्छेदको यो धर्मस्तदवच्छिन्नत्वस्य प्रतिबंधकतापदार्थत्वात्। अत्र
चाभावत्वेनाजनकत्वादिति। न च ज्ञानेन द्वितीयक्षणजनितसंस्कारेण तृतीयक्षणे स्मरणं स्यात् ध्वंसस्येव व्यापार
त्वासंभवात्। ध्वंसस्य प्रागभावकालेऽनुभवध्वंसाभावादिति वाच्यं। तत्रापि क्षणविलंबेनैव स्मरणाभ्युपगमादिति चे
न्न। संस्कारानभ्युपगमे उपेक्षात्मकज्ञानादपि स्मरणापत्तेः। न च स्मृतिं प्रत्युपेक्षान्यज्ञानत्वेनैव हेतुत्वकल्पनान्नानु
पपत्तिरिति वाच्यं। गौरवात्। न च भवन्मतेऽप्युपेक्षात्मकज्ञानात्संस्कारवारणाय तत्तज्जनकतायामुपेक्षान्यत्वनि
वेशस्यावश्यकत्वेन साम्यमिति किं अतिगडुना स्मृतिजनकतावच्छेदककोटौ तस्य निवेशेनैव सर्वसामञ्जस्यमिति वा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

स्मृ॰ सं॰
५

च्यं। संस्कारं प्रतिउपेक्षान्यज्ञानत्वेन हेतुत्वकल्पनस्य उद्दीच्यत्वेन फलमुखत्वात्। स्मृतिजनकतावच्छेदककोटिप्रविष्टां
ज्ञानापेक्षाज्ञानभेदकूटेन सर्वविशेषापेक्षात्मकज्ञानभेदकूटेन सह विशेषणविशेष्यभावविनिगमनाविरहेण गौरव
संपादकानामनिवेशलाघवात् सर्वविशेषापेक्षाभेदानामेव कारणतावच्छेदकीकृतस्य संस्कारं प्रतिज्ञानस्य हेतुतायाः
कल्पयितुमुचितत्वात्। एवं संस्कारस्वीकारे संस्कारं प्रतिउपेक्षाज्ञानप्रतिबंधकतयोपपत्तेः स्मृतिजनक
तायामुपेक्षाभेदसहस्राणां विशेषणविशेष्यभावविनिगमनाविरहेण गौरवसंपादकनामनिवेशलाघवान्न
च स्मृतिं प्रत्युपेक्षाज्ञानानां प्रतिबंधकत्वं कल्प्यत इति वाच्यं। कालांतरे स्मरणापत्तेः। न च तन्नध्वंसानां प्रतिबंधक
त्वमस्त्विति वाच्यं। यदा कदाचिज्ज्ञातोपेक्षाज्ञानानंतरं तद्धर्मकज्ञानोत्पत्तावपि स्मरणानुदयप्रसंगात्। प्रकारांत
रानुसारेणातीव गौरवं। एवं विपरीतज्ञाने नाशपत्त्यापि संस्कारसिद्धिः अन्यथा विपरीतज्ञानानंतरमपि अनुभव
नाशात् संस्मरणापत्तेः। मम तु विपरीतज्ञानेन संस्कारनाशात् संस्काररूपकारणविरहादेव स्मरणावारणात्। न च ५
विपरीतज्ञानध्वंसस्य प्रतिबंधकत्वात् नापत्तिरिति वाच्यं। विपरीतज्ञानोत्तरोत्पन्नानुभवनाशात् स्मरणानुदया
पत्तेः। अथ भूतलत्वावच्छिन्नधर्मिकघटत्वनास्मृतिं प्रति भूतलत्वावच्छिन्नधर्मिकघटत्वज्ञानध्वंसाभावविशि
ष्टभूतलविशेष्यकघटाभावप्रकारकज्ञानध्वंसत्वेन प्रतिबंधकताइत्याभावस्य स्वप्रतियोगिविशिष्टस्वसामानाधि

CC-0 Dharmartha Trust J&K. An eGangotri Vaidika Bharata Initiative

करण्यसंबंधावच्छिन्नप्रतियोगिताकः स्वप्रागभावविशिष्टस्वसामानाधिकरण्यसंबंधावच्छिन्नप्रतियोगिताको
वाप्रसिद्धः। तेन विपरीतज्ञानोत्तरं प्राग्घटज्ञानानुदयेपि पूर्वज्ञानध्वंससत्त्वान्न स्मरणापत्तिः। अथवा विपरी
तज्ञानध्वंसाभावग्राह्यध्वंसस्य हेतुत्वान्न विपरीतज्ञानोत्तरं स्मरणापत्तिः। विपरीतज्ञानध्वंसाभावस्य स्व
प्रागभावविशिष्टस्वसामानाधिकरण्यसंबंधावच्छिन्नप्रतियोगिताकोऽप्रसिद्धः। अतो न विपरीतज्ञानोत्तरोत्स
न्नानुभवनाश्यात्स्मरणानुपपत्तिरिति चेन्न। गौरवात्। तदपेक्षया संस्कारं स्वीकृत्य संस्कारनाशं प्रति वि
परीतज्ञानस्य जनकत्वकल्पनस्यैव लाघवेनोचितत्वात्। अयोद्बोधकानां अननुगततद्रूपेणैव हेतुत्वकल्पना
द्विपरीतज्ञानानंतरं फलानुदये नोद्बोधकस्यैवाकल्पनान्न स्मरणापत्तिः। न च संबंधिज्ञानादीनामेवानुगतहे
तुतायाः संभवात् विपरीतज्ञानोत्तरं तादृशानुगतोद्बोधकत्वे स्मरणापत्तिरिति वाच्यं। तेषामपि व्यक्तिपौर्वा
पर्यनिर्वाहाय तत्तद्व्यक्तित्वेन हेतुत्वकल्पनाया आवश्यकत्वात् विपरीतज्ञानोत्तरं व्यक्तीनां च फलावश्यंभा
वेन हेतुत्वकल्पनाभावात् आपत्त्यसंभवादिति चेन्नैवं तेषां तत्तद्व्यक्तित्वेन हेतुत्वकल्पनेपि सामान्यसाम
ग्रीतः सामान्यधर्मावच्छिन्नापत्तेः। न च तत्तद्विशेषसामग्रीसहकृताया एव सामान्यसामग्र्याः फलजनक
त्वान्न दोष इति वाच्यं। अनंततत्तद्व्यक्तीनां प्रातिस्विकरूपेण सहकारित्वकल्पने गौरवात्। अन्वयोपेक्षास

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

स्म॰सं॰
६
6

कज्ञानानंतरमपि उद्बोधकविरहेणैवास्मरणसंभवेन उपेक्षान्यत्वेनापि हेतुताविलयप्रसंगात् । उक्तयुक्त्या अ
नुभवादिहेतुताविलयापत्तिश्चेति वदंति । अथ संस्कारस्य सविषयकत्वे किं मानं । न च स्मृतिविषयतानिया
मकत्वेन तद्विषयतासिद्धिः ज्ञानविषयताया एव नियामकत्वात् । न च विपरीतज्ञाननाश्यतावच्छेदकतासिद्धिः ।
घटज्ञानजन्यसंस्कारत्वस्यैव घटाभाववत्ताज्ञाननाश्यतावच्छेदकत्वात् । न च तादृशगुरुधर्मापेक्षया घटगो
चरसंस्कारत्वस्यैवावच्छेदकत्वौचित्यात् संस्कारविषयतासिद्धिरिति वाच्यं । लौकिकचाक्षुषजन्यसंस्कारस्यानुमाना
दिविपरीतज्ञाननाश्यतायाः ज्ञानविशेषजन्यतायाश्चावश्यं निवेश्यत्वात् । न च स्मृतिनाश्यतावच्छेदकतया तत्सि
द्धिः घटज्ञानजन्यसंस्कारस्य पटगोचरस्मरणानाश्यत्वात् घटगोचरस्मरणस्य घटगोचरसंस्कारत्वस्यैव नाश्यताव
च्छेदकत्वात् घटज्ञानजन्यसंस्कारत्वस्य तथात्वे गौरवादिति वाच्यं । विपरीतज्ञानादिजन्यसंस्कारनाशे व्यभिचारवार
णाय स्वसामानाधिकरण्यविशिष्टकालिकविशेषणतासंबंधेन स्मरणविशिष्टसंस्कारनाशत्वस्य जन्यतावच्छेद ६
कतया आवश्यकत्वेन व्यभिचारवारणे विशेषनिवेशं विनाप्युपपत्तेः । न च मास्तु व्यभिचारः एवमपि कदाचिद्घ
टज्ञानजन्यसंस्कारस्य नाशः कदाचित्तदन्यजन्यस्येति नियामकाभाव इति वाच्यं प्रतियोगितासंबंधेन संस्कार
नाशं प्रति जनकतासंबंधेन स्मरणत्वेन हेतुताभ्युपगमात् घटज्ञानजन्यसंस्कारस्य परस्मरणाजन्यतया तत्र ज

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नकतासंबंधेन स्मरणाभावान्नातिप्रसंग इति चेन्न। ज्ञानजन्यतावच्छेदकतया संस्कारविषयतासिद्धेः। तथा हि संस्का
रं प्रति यदि ज्ञानस्य विषयामिश्रितएव तज्ज्ञानत्वेन हेतुता तदा उपेक्षात्मकज्ञानात् संस्कारवारणाय घटपटादिविष
यकानंतोपेक्षाभेदानामेकत्र निवेशे गौरवात्। परं तु घटविषयकज्ञानत्वादिनाऽनेकताऽजन्यतावच्छेदकं च यदि सं
स्कारत्वं तदा व्यभिचार इति घटविषयकसंस्कारत्वमेव तथेति तत्सिद्धिः। यदि चोपेक्षाज्ञानभेदानां कारणतावच्छेद
ककोटौ न निवेशः किं तु तादृशज्ञानात् संस्कारादिवारणाय संस्कारान् प्रति तेषां प्रतिबंधकत्वकल्पनमेव समीचीनं
लाघवात्। तथा च संस्कारविषयतायां युक्त्यभाव इति विभाव्यते तथापि आंशिकोपेक्षाज्ञानप्रतिबध्यतावच्छेदकत
या संस्कारविषयतासिद्धिः। तथा हि सर्वांशोपेक्षाज्ञानस्य प्रतिबध्यतावच्छेदकं संस्कारत्वं तत्सत्त्वे कुत्राप्यं
शे संस्कारो न स्यात् तद्वत् आंशिकोपेक्षाज्ञानस्य प्रतिबध्यतावच्छेदकं यदि संस्कारत्वं तदा धर्म्यंशेऽपि संस्कारो न स्य
प्रसंग इति तत्तद्विषयकसंस्कारं प्रति तत्तद्व्यक्तित्वेन प्रतिबंधकत्वं कल्प्यमिति संस्कारविषयतासिद्धिः। एवं सं
स्कारस्य विषयतानभ्युपगमे घटादौ उपेक्षात्मकज्ञानानंतरं घटस्मरणापत्तिः व्यापारसंबंधेन घटज्ञानसत्त्वात्।
न चोपेक्षान्यज्ञानस्यैव संस्कारसंबंधेन हेतुत्वोपगमान्नापत्तिरिति वाच्यं। तथापि घटस्मरणादपि घटज्ञानजन्य
संस्कारनाशापत्तिः। नचा[illegible]रीत्या प्रतियोगितासंबंधेन संस्कारनाशं प्रति जनकतासंबंधेन स्मृतित्वेन हेतुत्वात् न

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

दोषइतिवाच्यं।ऽनुभवकतायाः स्वरूपयोग्यतारूपायाः प्रत्यासत्तेश्च पटज्ञानजन्यसंस्कारस्यापि संस्कारत्वेन निखिलु
स्मर्यतिस्वरूपयोग्यतयातादृशसंबंधेन घटस्मृतेरपि तत्रसत्त्वात्।न च घटस्मृतिंप्रति घटज्ञानजन्यसंस्कारत्वे
नैवस्वरूपयोग्यतेतिवाच्यं।तद्रूपस्यालाघवेन घटविषयकसंस्कारत्वेनैवतयात्वकल्पनायाऔचित्यात्प्रकृत
सिद्धिः।नापिफलोपधायकतायाः प्रत्यासत्तित्वं।अननुगमात्।यदि च सामानाधिकरण्यमेवनाश्यकृतावुद्धेस्त
प्रत्यासत्तिः तथापिन निस्तारः तेनसंबंधेन घटे स्मरणस्य पटज्ञानजन्यसंस्कारसत्त्वात् तन्नाशापत्तेर्वारणादेवत
त्सिद्धिः।न च भवन्मते घटादिगोचरसंस्कारनाशस्य जन्यतावच्छेदकत्वेपितादृशधर्मावच्छिन्नस्यैव पटसंस्कारेआ
पत्तिःकारणतावच्छेदकप्रत्यासत्त्या तत्कारणसत्त्वादितिवाच्यं।तादृशसंस्कारनाशत्वावच्छिन्नंप्रतितादृशस्य प्रत्यास
त्यातादृशसंस्कारत्वेन हेतुत्वकल्पनात्।न च सामानाधिकरण्यस्य स्वरूपयोग्यतायावा प्रत्यासत्तित्वे स्मरण
जन्यसंस्कारस्य क्षणिकत्वोपपत्तिः।स्वजन्यसंस्कारे तादृशप्रत्यासत्तिभ्यां स्मरणसत्त्वात्।अत उपधायकतायाः प्र ७
त्यासत्तित्वं तत्संस्कारनाशत्वं च जन्यतावच्छेदकं वाच्यमिति कुतः संस्कारस्य विषयतासिद्धिरिति वाच्यं।क्षणिकसंस्का
राभ्युपगमे संभावात्।तृतीयक्षणोत्पन्नसंस्कारादेव स्मरणनिर्वाहात्।अस्तु वा ऽननुगतोपधायकतायाः प्र
त्यासत्तित्वं।ततोसंस्कारनाशत्वावच्छिन्ने तावच्छेदकत्वेनापेक्ष्य लाघवादिनश्वरस्व स्वज्ञानत्वेनैव संस्कारहेतुत्वं।वि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नस्पर्शवत्त्वं च न त्वाश्रयनाशविशिष्टत्वं आश्रयस्यात्मनो नाशासंभवात् अपि तु स्वप्रागभावविशिष्टकालिकविशेषण
तयाकृतिविशिष्टत्वमतो नाननुगमः । तथा च तृतीयक्षण एव ज्ञानेन संस्कारजननान्नाशस्य [illegible]णिकसंस्कारापत्तेः । अ
यथा स्वसामानाधिकरण्यावच्छिन्नस्वप्रागभावसंबंधेन स्मृतित्वेन नाशकतायाः अभ्युपगमात् स्वजन्यसंस्कारस्य नानो
नाशः स्वप्रागभाववत्त्वलक्षणसंबंधाभावात् । वस्तुतस्तु आशुविनाशीनां क्षणिकतावारणाय प्रतियोगितासंबंधेन नाश
१९ त्वावच्छिन्नं प्रति स्वप्रतियोगिभिन्नत्वसंबंधेन नाशत्वेन हेतुत्वं कल्पनीयम् आवश्यकत्वात् तत एव सर्वत्र क्षणिकतावारणसं
भवादिति । एवमनुमित्यात्मकविपरीतज्ञानस्य कार्यतावच्छेदकं यदि संस्कारनाशत्वं तदाऽनुमित्यात्मकविपरीतज्ञा
नात् लौकिकचाक्षुषजन्यसंस्कारापत्तिः । यदि च लौकिकज्ञानजन्यसंस्कारनाशत्वं तदा घटवद्भूतलमिति ज्ञानात्
त्पिपरशाचरसंस्कारनाशाप्रसंगः । न च लौकिकज्ञानजन्यघटवद्भूतलमिति ज्ञानजन्यसंस्कारनाशत्वावच्छिन्नं प्रति
घटाभाववद्भूतलमिति निर्णयत्वेन हेतुत्वमतो न दोष इति वाच्यम् । जन्यत्वादिनिवेशे गौरवात् । लाघवात्तदंशलौ
किकज्ञानजन्यतद्विशेष्यकतत्प्रकारकसंस्कारनाशत्वावच्छिन्नं प्रति तद्विशेष्यकतदभावप्रकारकनिर्णयत्वेन हेतुत्वोपगमात् त
द्वच्छिन्नजन्यतावच्छेदकघटकतया संस्कारविषयतासिद्धिरिति । एवं संस्कारविषयतानभ्युपगमे घटस्मरणादिसामा
न्यसामग्र्याः उद्बोधकादिविशिष्टघटज्ञानजन्यसंस्कारत्वेनैव प्रतिबंधकत्वं अनुभवं प्रतिकल्पनीयमिति गौरवं ॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

मन्मते घटविषयकसंस्कारत्वेनातिलाघवात्। न च मन्मतेपि संस्कारसंबंधेन घटज्ञानत्वेन प्रतिबंधकत्वात् न गौरवमि
ति वाच्यं। संस्कारादिना घटादिस्मरणकाले ज्ञानरूपप्रतिबंधकाभावसत्वेन प्रतिबध्यज्ञानापत्तिरिति संस्कारजन्यस्मरण
स्य घटगोचरस्मरणत्वेन हेतुता जन्यतावच्छेदकं घटविषयकसंस्कारनाश्यतां। प्रमा सत्तिर्विचारितैव॥ अथ स्मरणस्य सं
स्कारनाशकत्वे मानाभावः स्मरणेनापि संस्कारस्य जननात् स्मरणोत्तरमपि स्मरणोदयात् पूर्वसंस्कारसत्वेपि क्षतिविर
हादिति चेत् न। अनुभवानंतरं यत्रोपेक्षात्मकस्मरणं तदनंतरं स्मरणवारणाय तथात्वस्यावश्यकत्वात्। अथ काल
रोगादिजन्यसंस्कारनाशे व्यभिचारः कालाद्यजन्यत्वस्य निवेशे तुल्ययुक्त्या तज्जन्यतावच्छेदककोटावपि स्मरणजन्य
त्वस्य निवेशेऽन्योन्याश्रयात्। नापि वैजात्यं तन्नाश्यतावच्छेदकं तुल्ययुक्त्या विपरीतज्ञानजन्यतावच्छेदकतयापि वैजा
त्यसिद्ध्यापत्तेः क्रमाच्च नाश्यसंस्कारेऽपि प्रत्येकं परिहारेण वर्त्तमानत्वापत्त्या घटस्मरणपरविपरीतज्ञाननाश्यघटपटस्माचर
से समूहालंबने संस्कारे सांकर्यापत्तेः। तत्र वैजात्यांतरस्वीकारे इति गौरवापत्तेरिति चेत् न। यस्य यस्य सामानाधिकरण्यादि वि
शिष्टकालित्वविशेषणतया स्मरणविशिष्टसंस्कारनाशत्वमेव तादृशस्मरणजन्यतावच्छेदकं रोगकालादीनां चाननुगत
तया तत्तद्व्यक्तित्वं विपरीतज्ञानस्य चैवजात्यं। न च विनिगमनाविरहः किं स्मरणस्य नाश्यतावच्छेदकं तद्विपरीतज्ञानस्य
वेति वाच्यं। विपरीत निश्चयस्य नाशकतायां नाशकतावच्छेदकगौरवात्। अत एव विशिष्यस्य नाशकतावच्छेदकत्वस्व

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

कार्यतावच्छेदककोटिप्रविष्टविशेषणानां विशेष्यविशेषणभावेन नानाधर्मावच्छिन्नकारणतायाः बाहुल्यापत्तेः। तत्रैवैव
१ जातस्य नाशत्वतावच्छेदकत्वौचित्यात् इति। अथ यत्र महाकालेन संस्कारस्य प्रत्येकं गोचरस्मरणान्नाशोपत्तिः घटपटोभय
विषयकसंस्कारस्य घटपटविषयतयोः तन्नाशकीभूतघटस्मरणस्य सत्त्वात्। न च पटविषयकसंस्कारस्य नाशोपपत्तये स्म
रणस्य हेतुत्वात् तस्य पटविषयकत्वेन पटस्मरणरूपनाशकाभावान्न नाशक इति वाच्यं। पटस्मरणं विनापि स्वकार्य
तावच्छेदकावच्छिन्नजननात् अपितु घटापत्तिसंभवात् तन्नाशस्युपगमे चानंतरं पटस्मरणानुपपत्तिरिति। न च चर
मस्मृतित्वेन नाशकत्वान्न दोष इति वाच्यं। चरमत्वस्य निर्वक्तुमशक्यत्वात्। न च स्वजनकसंस्कारजन्यस्मृतिप्रागभा
ववित्त्वविशिष्टान्यत्वं जनकत्वादिकं च फलोपधायकत्वादिरूपं ग्राह्यं। अन्यथा संस्कारांतरजन्यस्मृतिप्रागभावकालीनस्या
पि चरमत्वानुपपत्तिरिति वाच्यं। स्वत्वघटितत्वेन तदननुगमात् स्वप्रतियोग्युपधायकसंस्कारोपहितत्वविशिष्टका
लिकसंबंधेन स्मृतिप्रागभावविशिष्टं यत्तदन्यत्वरूपस्यापि अननुगतोपधायकताघटितत्वात् प्रथमस्मृतिस्वसं
त स्कारनाशापत्तिश्चरमशालिनी न भवति अंत्यस्मृतिस्तथा भवतीत्यत्र नियामकाभावाच्च। न चैवं नाशं यमेव चरमं स्वंत
त्रफलबलमेव कल्प्यं अतो न दोष इति वाच्यं। तादृशजातेरेकस्या एव सकलस्मरणे नाशकतावच्छेदकत्वे घटपटोभयकु
ड्यकुशलैतादृशसंस्कारद्वयजनितात् घटपटविषयककुड्यकुशलविषयकसंस्कारनाशापत्तिः घटपटावितिसं
स्कारनाशकत्वानुरोधेन तादृशजातिस्तत्रावश्यमभ्युपेया कुड्यकुशलावितिसंस्कारनाशकतावच्छेदकजाते घटसंस्कार

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

स्म॰सं॰

१ रनाशकतावच्छेदकजात्यन्यत्वेन घटसंस्कारनाशकस्मरणकुड्यसंस्कारनाशकस्मरणयोः परस्परपरीहारेण वर्त्तमानयो
रुभयसंस्कारनाशकसमूहालंबनस्मरणे सांकर्यापत्तेः। न च चरमस्मृतित्वं यावच्चरमस्मृतिसाधारणी एकैव जातिः का
र्यकारणभावस्तु तद्विषयकसंस्कारनाशत्वतद्विषयकचरमस्मृतित्वाभ्यामिति नोक्तदोष इति वाच्यं। तादृशी जातिः प्र
थमस्मरणे नास्ति किं तु चरमस्मृतावित्यत्रानुगतनियामकाभावात् अननुगतानां तत्तत्क्षणादीनामेवमंगीकार्यमिति
महागौरवे[illegible]। न चान्येनगत्या तादृशगौरवसहिष्णुतास्त्वीति वाच्यं। गत्यंतरस्य[illegible] वक्ष्यमाणत्वादिति चेत्। अत्र
केचित्। घटविषयकसंस्कारत्वेन नाश्यता घटस्मरणेन नाशकता। एवं घटपटोभयगोचरसंस्कारत्वेन नाश्यता घट
पटस्मरणत्वेन नाशकता। विशिष्यप्रतियोगिनामपि तथा हेतुत्वं कल्प्यतेऽनायसमाहुः। अन्ये तु समूहालंबनस्था
नाऽपि घटादिमात्रविषयकविषयता नानैव संस्काराज्जायंते न तु समूहालंबनसं[illegible]स्कारः। तथा च घटस्मरणं तेन घटसंस्का
रान् स्यति नान्यः। न च समूहालंबनसंस्कारानभ्युपगमेऽपि घटवद्भूतलमिति ज्ञानात् विशिष्टविषयक एव संस्कारोऽ
भ्युपेयः। अन्यथा विशिष्टस्मरणानुपपत्तिः तथा भूतलाद्युद्बोधकविरहकालीनघटमात्रविषयकस्मरणात् विशिष्ट १
त२ संस्कारनाशापत्तिरिति वाच्यं। घटमुख्यविशेष्यकसंस्कारस्यैव घटस्मरणनाश्यतावच्छेदकत्वात्। घटवद्भूतलमिति
संस्कारनाशो विशिष्टविषयकस्मृतित्वेन हेतुत्वं तरस्यावश्यकत्वात्। अन्यथा विशेषकलित[illegible] घटभूतलयोः स्मर
णात् तथाविधसंस्कारनाशापत्तिः। अथैवमपि घटवद्भूतलं पटवदिति संस्कारस्य घटाभाववद्भूतलमिति विपरीतज्ञा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नेननाशेपरत्वरितिस्मरणानुपपत्तेः। न च यत्र यत्र यादृशविशिष्टस्मरणमुत्पद्यते तत्रापि घटवद्भूतलं पटवद्भूतलमिति सं
स्कारद्वयमेवाभ्युपेयते ननु विशिष्टविषयताशाली एकः संस्कार इति वाच्यं। कुत्रचिद्विशिष्टविषयकसंस्कारस्याव
श्यकत्वे तत्रैव तादृशसंस्कारघटकीभूतएकधर्मावच्छिन्नेअपरधर्मावच्छिन्नप्रतियोगिताकाभावसत्वे ×ज्ञान×
नतादृशसंस्कारनाशापत्तेः। न चेष्टापत्तिः। तादृशविपरीतज्ञानोत्तरं तथाविधविशिष्टस्मरणापलापप्रसंगादि
ति चेन्न। तादृशानुभवस्य प्रामाणिकत्वे तद्धर्मावच्छिन्नमुख्यविशेष्यकतद्धर्मावच्छिन्नप्रकारकसंस्कारनाशत्वाव
च्छिन्नं प्रति तद्धर्मावच्छिन्नविशेष्यकतद्धर्मावच्छिन्नाभावप्रकारकज्ञानत्वेन हेतुत्वान्नानुपपत्तिः। न च तथापि वह्नि
व्याप्यभाववान् धूम इति ज्ञानकाले वह्निव्याप्यो धूम इति संस्कारसत्वे विपरीतज्ञानकारणबलात्तन्नाशापत्ति
रिति वाच्यं। तादृशसंस्कारनाशं प्रति तादृशसंस्कारस्यापि प्रतियोगिविधया हेतुत्वेन तदभावादेव तथापत्त्यसं
भवादित्याहुः॥ ॥छ॥ ॥छ॥ इति स्मृतिसंस्कारविचारः समाप्तः॥छ॥ संवत् १७३८ आश्विनसंस्कृत्प्र
तिपदि त्र्यंबकभट्टप्रतिष्ठानकरेण कारूपालि लिखितोयं ग्रंथः॥ ॥श्रीरामचंद्र॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

स्मृ॰सं॰
१०
10

स्मृतिसार
श्लो॰
२८८

१०

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative